# Shri Shiva Sahasranamastotram from devIbhAgavata

# શ્રીશિવસહસ્રનામસ્તોત્રમ્ દેવીભાગવતાન્તર્ગતમ્

## Document Information

Text title : shivasahasranAmastotra from devIbhAgavata

File name : shivasahasranAmastotradevIbhAgavata.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : DPD

Proofread by : DPD, Nithesh Bharadwaj Sivakumar

Description/comments : bhagIrathakRitam shrImahAdevIbhAgavata upapurANe

Latest update : March 31, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2022

*sanskritdocuments.org*

# શ્રીશિવસહસ્રનામસ્તોત્રમ્ દેવીભાગવતાન્તર્ગતમ્

ભગીરથકૃતં  શ્રીમહાદેવીભાગવત ઉપપુરાણે
ભગીરથ ઉવાચ-
ૐ નમસ્તે પાર્વતીનાથ દેવદેવ પરાત્પર ।
અચ્યુતાનઘ પઞ્ચાસ્ય ભીમાસ્ય રુચિરાનન ॥ ૧॥

વ્યાઘ્રાજિનધરાનન્ત પારાવારવિવર્જિત ।
પઞ્ચાનન મહાસત્ત્વ મહાજ્ઞાનમય પ્રભો ॥ ૨॥

અજિતામિતદુર્ધર્ષ વિશ્વેશ પરમેશ્વર ।
વિશ્વાત્મન્વિશ્વભૂતેશ વિશ્વાશ્રય જગત્પતે ॥ ૩॥

વિશ્વોપકારિન્વિશ્વૈકધામ વિશ્વાશ્રયાશ્રય ।
વિશ્વાધાર સદાનન્દ વિશ્વાનન્દ નમોઽસ્તુ તે ॥ ૪॥

શર્વ સર્વવિદજ્ઞાનવિવર્જિત સુરોત્તમ ।
સુરવન્દ્ય સુરસ્તુત્ય સુરરાજ સુરોત્તમ ॥ ૫॥

સુરપૂજ્ય સુરધ્યેય સુરેશ્વર સુરાન્તક ।
સુરારિમર્દક સુરશ્રેષ્ઠ તેઽસ્તુ નમો નમઃ ॥ ૬॥

ત્વં શુદ્ધઃ શુદ્ધબોધશ્ચ શુદ્ધાત્મા જગતાં પતિઃ ।
શમ્ભુઃ સ્વયમ્ભૂરત્યુગ્ર ઉગ્રકર્મોગ્રલોચનઃ ॥ ૭॥

ઉગ્રપ્રભાવશ્ચાત્યુગ્રમર્દકોઽત્યુગ્રરૂપવાન્ ।
ઉગ્રકણ્ઠઃ શિવઃ શાન્તઃ સર્વશાન્તિવિધાયકઃ ॥ ૮॥

સર્વાર્થદઃ શિવાધારઃ શિવાયનિરમિત્રજિત્ ।
શિવદઃ શિવકર્તા ચ શિવહન્તા શિવેશ્વરઃ ॥ ૯॥

શિશુઃ શૈશવયુક્તસ્ચ પિઙ્ગકેશો જટાધરઃ ।
ગઙ્ગાધરકપર્દી ચ જટાજૂટવિરાજિતઃ ॥ ૧૦॥

જટિલો જટિલારાધ્યઃ સર્વદોન્મત્તમાનસઃ ।
ઉન્મત્તકેશ ઉન્મત્ત ઉન્મત્તાનામધીશ્વરઃ ॥ ૧૧॥

ઉન્મત્તલોચનો ભીમસ્ત્રિનેત્રો ભીમલોચનઃ ।
બહુનેત્રો દ્વિનેત્રી ચ રક્તનેત્રઃ સુનેત્રકઃ ॥ ૧૨॥

દીર્ઘનેત્રસ્ય પિઙ્ગાક્ષઃ સુપ્રભાખ્યઃ સુલોચનઃ ।
સોમનેત્રોઽગ્નિનેત્રાખ્યઃ સૂર્યનેત્રઃ સુવીર્યવાન્ ॥ ૧૩॥

પદ્માક્ષઃ કમલાક્ષશ્ચ નીલોત્પલદલેક્ષણઃ ।
સુલક્ષણઃ શૂલપાણિઃ કપાલી કપિલેક્ષણઃ ॥ ૧૪॥

વ્યાઘૂર્ણનયનો ધૂર્તો વ્યાઘ્રચર્મામ્બરાવૃતઃ ।
શ્રીકણ્ઠો નીલકણ્ઠાખ્યઃ શિતિકણ્ઠઃ સુકણ્ઠકઃ ॥ ૧૫॥

ચન્દ્રચૂડશ્ચન્દ્રધરશ્ચન્દ્રમૌલિઃ શશાઙ્કભૃત્ ।
શશિકાન્તઃ શશાઙ્કાભઃ શશાઙ્કાઙ્કિતમૂર્ધજઃ ॥ ૧૬॥

શશાઙ્કવદનો વીરો વરદો વરલોચનઃ ।
શરચ્ચન્દ્રસમાભાસઃ શરદિન્દુસમપ્રભઃ ॥ ૧૭॥

કોટિસૂર્યપ્રતીકાશશ્ચન્દ્રાસ્યશ્ચન્દ્રશેખરઃ ।
અષ્ટમૂર્તિર્મહામૂતિર્ભીમમૂર્તિર્ભયાનકઃ ॥ ૧૮॥

ભયદાતા ભયત્રાતા ભયહર્તા ભયોજ્ઝિતઃ ।
નિર્ભૂતો ભૂતવન્દ્યશ્ચ ભૂતાત્મા ભૂતભાવનઃ ॥ ૧૯॥

કૌપીનવાસા દુર્વાસા વિવાસાઃ કામિનીપતિઃ ।
કરાલઃ કીર્તિદો વૈદ્યઃ કિશોરઃ કામનાશનઃ ॥ ૨૦॥

કીર્તિરૂપઃ કુન્તધારી કાલકૂટકૃતાશનઃ ।
કાલકૂટઃ સુરૂપી ચ કુલમન્ત્રપ્રદીપકઃ ॥ ૨૧॥

કલાકાષ્ઠાત્મકઃ કાશીવિહારી કુટિલાનનઃ ।
મહાકાનનસંવાસી કાલીપ્રતિવિવર્ધનઃ ॥ ૨૨॥

કાલીધરઃ કામચારિ કુલકીર્તિવિવર્ધનઃ ।
કામાદ્રિઃ કામુકવરઃ કાર્મુકી કામમોહિતઃ ॥ ૨૩
કટાક્ષઃ કનકાભાસઃ કનકોજ્જ્વલગાત્રકઃ ।
કામાતુરઃ ક્વણત્પાદઃ કુટિલભ્રુકુટીધરઃ ॥ ૨૪॥

કાર્તિકેયપિતા કોકનદભૂષણભૂષિતઃ ।
ખટ્વાઙ્ગયોદ્ધા ખડ્ગી ચ ગિરીશો ગગનેશ્વરઃ ॥ ૨૫
ગણાધ્યક્ષઃ ખેટકધૃક્ ખર્વઃ ખર્વતરઃ ખગઃ ।
ખગારૂઢઃ ખગારાધ્યઃ ખેચરઃ ખેચરેશ્વરઃ ॥ ૨૬॥

ખેચરત્વપ્રદઃ ક્ષોણીપતિઃ ખેચરમર્દકઃ ।
ગણેશ્વરો ગણપિતા ગરિષ્ઠો ગણભૂપતિઃ ॥ ૨૭॥

ગુરુર્ગુરુતરો જ્ઞેયો ગઙ્ગાપતિરમર્ષણઃ ।
ગીતપ્રિયો ગીતરતઃ સુગોપ્યો ગોપવૃન્દપઃ ॥ ૨૮॥

ગવારૂઢો જગદ્ભર્તા ગોસ્વામી ગોસ્વરૂપકઃ ।
ગોપ્રદો ગોધરો ગૃધ્રો ગરુત્માન્ ગોકૃતાસનઃ ॥ ૨૯।
ગોપીશો ગુરુતાતશ્ચ ગુહાવાસી સુગોપિતઃ ।
ગજારૂઢો ગજાસ્યશ્ચ ગજાજિનધરોઽગ્રજઃ ॥ ૩૦॥

ગ્રહાધ્યક્ષો ગ્રહગણો દુષ્ટગ્રહવિમર્દકઃ ।
માનરૂપી ગાનરતઃ પ્રચણ્ડો ગાનવિહ્વલઃ ॥ ૩૧॥

ગાનમત્તો ગુણી ગુહ્યો ગુણગ્રમાશયો ગુણઃ ।
ગૂઢબુદ્ધિર્ગૂઢમૂર્તિર્ગૂઢપાદવિભૂષિતઃ ॥ ૩૨॥

ગોપ્તા ગોલોકવાસી ચ ગુણવાન્ગુણિનાં વરઃ ।
હરો હરિતવર્ણાક્ષો મૃત્યુર્મૃત્યુઞ્જયો હરિઃ ॥ ૩૩॥

હવ્યભુઘરિસમ્પૂજ્યો હવિર્હવિર્ભુજાં વરઃ ।
અનાદિરાદિઃ સર્વાદ્ય આદિતેયવરપ્રદઃ ॥ ૩૪॥

અનન્તવિક્રમો લોકો લોકાનાં પાપહારકઃ ।
ગીષ્પતિઃ સદ્ગુણોપેતઃ સગુણો નિર્ગુણો ગુણી ॥ ૩૫॥

ગુણપ્રીતો ગુણવરો ગિરિજાનાયકો ગિરિઃ ।
ગૌરીભર્તા ગુણાઢ્યશ્ચ ગોશ્રેષ્ઠાસનસંસ્થિતઃ ॥ ૩૬॥

પદ્માસનઃ પદ્મનેત્રઃ પદ્મતુષ્ટઃ સુપદ્મકઃ ।
પદ્મવક્ત્રઃ પદ્મકરઃ પદ્મારૂઢપદામ્બુજઃ ॥ ૩૭॥

પદ્મપ્રિયતમઃ પદ્માલયઃ પદ્મપ્રકાશકઃ ।
પદ્મકાનનસંવાસઃ પદ્મકાનનભઞ્જકઃ ॥ ૩૮॥

પદ્મકાનનસંવાસી પદ્મારણ્યકૃતાલયઃ ।
પ્રફુલ્લવદનઃ ફુલ્લકમલાક્ષઃ પ્રફુલ્લકૃત્ ॥ ૩૯॥

ફુલ્લેન્દીવરસન્તુષ્ટઃ પ્રફુલ્લકમલાસનઃ ।
ફુલ્લામ્ભોજકરઃ ફુલ્લમાનસઃ પાપહારકઃ ॥ ૪૦॥

પાપાપહારી પુણ્યાત્મા પુણ્યકીર્તિઃ સુપુણ્યવાન્ ।
પુણ્યઃ પુણ્યતમો ધન્યઃ સુપૂતાત્મા પરાત્મકઃ ॥ ૪૧॥

પુણ્યેશઃ પુણ્યદઃ પુણ્યનિરતઃ પુણ્યભાજનઃ ।
પરોપકારી પાપિષ્ઠનાશકઃ પાપહારકઃ ॥ ૪૨॥

પુરાતનઃ પૂર્વહીનઃ પરદ્રોહવિવર્જિતઃ ।
પીવરઃ પીવરમુખઃ પીનકાયઃ પુરાન્તકઃ ॥ ૪૩॥

પાશી પશુપતિઃ પાશહસ્તઃ પાષાણવિત્પતિઃ ।
પલાત્મકઃ પરો વેત્તા પાશબદ્ધવિમોચકઃ ॥ ૪૪॥

પશૂનામધિપઃ પાશચ્છેત્તા પાશવિભેદકઃ ।
પાષાણધારી પાષાણશયાનઃ પાશિપૂજિતઃ ॥ ૪૫॥

પશ્વારૂઢઃ પુષ્પધનુઃ પુષ્પવૃન્દસુપૂજિતઃ ।
પુણ્ડરીકઃ પીતવાસા પુણ્ડરીકાક્ષવલ્લભઃ ॥ ૪૬॥

પાનપાત્રકરઃ પાનમત્તઃ પાનાતિભૂતકઃ ।
પોષ્ટા પોષ્ટૃવરઃ પૂતઃ પરિત્રાતાઽખિલેશ્વરઃ ॥ ૪૭॥

પુણ્ડરીકાક્ષકર્તા ચ પુણ્ડરીકાક્ષસેવિતઃ ।
પલ્લવસ્થઃ પ્રપીઠસ્થઃ પીઠભૂમિનિવાસકઃ ॥ ૪૮॥

પિતા પિતામહઃ પાર્થપ્રસન્નોઽભીષ્ટદાયકઃ ।
પિતૃણાં પ્રીતિકર્તા ચ પ્રીતિદઃ પ્રીતિભાજનઃ ॥ ૪૯॥

પ્રીત્યાત્મકઃ પ્રીતિવશી સુપ્રીતઃ પ્રીતિકારકઃ ।
પ્રીતિહૃત્પ્રીતિરૂપાત્મન્ પ્રીતિયુક્તસ્ત્વમેવ હિ ॥ ૫૦॥

પ્રણતાર્તિહરઃ પ્રાણવલ્લભઃ પ્રાણદાયકઃ ।
પ્રાણી પ્રાણસ્વરૂપશ્ચ પ્રાણગ્રાહી મુનિર્દયઃ ॥ ૫૧॥

પ્રાણનાથઃ પ્રીતમનાઃ સર્વેષાં પ્રપિતામહઃ ।
વૃદ્ધઃ પ્રવૃદ્ધરૂપશ્ચ પ્રેતઃ પ્રણયિનાં વરઃ ॥ ૫૨॥

પરાધીશઃ પરં જ્યોતિઃ પરનેત્રઃ પરાત્મકઃ ।
પારુષ્યરહિતઃ પુત્રી પુત્રદઃ પુત્રરક્ષકઃ ॥ ૫૩ ॥

પુત્રપ્રિયઃ પુત્રવશ્યઃ પુત્રવત્પરિપાલકઃ ।
પરિત્રાતા પરાવાસઃ પરચેતાઃ પરેશ્વરઃ ॥ ૫૪ ॥

પતિઃ સર્વસ્ય સમ્પાલ્યઃ પવમાનઃ પરોઽન્તકઃ ।
પુરહા પુરુહૂતશ્ચ ત્રિપુરારિઃ પુરાન્તકઃ ॥ ૫૫ ॥

પુરન્દરોઽતિસમ્પૂજ્યઃ પ્રધર્ષો દુષ્પ્રધર્ષણઃ ।
પટુઃ પટુતરઃ પ્રૌઢઃ પ્રપૂજ્યઃ પર્વતાલયઃ ॥ ૫૬ ॥

પુલિનસ્થઃ પુલસ્ત્યાખ્યઃ પિઙ્ગચક્ષુઃ પ્રપન્નગઃ ।
અભીરુરસિતાઙ્ગશ્ચ ચણ્ડરૂપઃ સિતાઙ્ગકઃ ॥ ૫૭ ॥

સર્વવિદ્યાવિનોદશ્ચ સર્વસૌખ્યયુતઃ સદા ।
સુખહર્તા સર્વસુખી સર્વલોકૈકપાવનઃ ॥ ૫૮ ॥

સદાવનઃ સારદશ્ચ સુસિદ્ધઃ શુદ્ધરૂપકઃ ।
સારઃ સારતરઃ સૂર્યઃ સોમઃ સર્વપ્રકાશકઃ ॥ ૫૯ ॥

સોમમણ્ડલધારી ચ સમુદ્ર સિન્ધુરૂપવાન્ ।
સુરજ્યેષ્ઠઃ સુરશ્રેષ્ઠઃ સુરાસુરનિષેવિતઃ ॥ ૬૦ ॥

સર્વધર્મવિનિર્મુક્તઃ સર્વલોકનમસ્કૃતઃ ।
સર્વાચારયુતઃ સૌરઃ શાક્તઃ પરમવૈષ્ણવઃ ॥ ૬૧ ॥

સર્વધર્મવિધાનજ્ઞઃ સર્વાચારપરાયણઃ ।
સર્વરોગપ્રશમનઃ સર્વરોગાપહારકઃ ॥ ૬૨ ॥

પ્રકૃષ્ટાત્મા મહાત્મા ચ સર્વધર્મપ્રદર્શકઃ ।
સર્વસમ્પદ્યુતઃ સર્વસમ્પદ્દાનસમેક્ષણઃ ॥ ૬૩ ॥

સહાસ્યવદનો હાસ્યયુક્તઃ પ્રહસિતાનનઃ ।
સાક્ષી સમક્ષવક્તા ચ સર્વદર્શી સમસ્તવિત્ ॥ ૬૪ ॥

સકલજ્ઞઃ સમર્થજ્ઞઃ સુમનાઃ શૈવપૂજિતઃ ।
શોકપ્રશમનઃ શોકહન્તાઽશોચ્યઃ શુભાન્વિતઃ ॥ ૬૫ ॥

શૈલજ્ઞઃ શૈલજાનાથઃ શૈલનાથઃ શનૈશ્ચરઃ ।

શશાઙ્કસદૃશજ્યોતિઃ શશાઙ્કાર્ધવિરાજિતઃ ॥ ૬૬॥

સાધુપ્રિયઃ સાધુતમઃ સાધ્વીપતિરલૌકિકઃ ।
શૂન્યરૂપઃ શૂન્યદેહઃ શૂન્યસ્થઃ શૂન્યભાવનઃ ॥ ૬૭॥

શૂન્યગામી શ્મશાનસ્થઃ શ્મશાનાધિપતિઃ સુવાક્ ।
શતસૂર્યપ્રભઃ સૂર્યઃ સૂર્યદીપ્તઃ સુરારિહા ।
શુભાન્વિતઃ શુભતનુઃ શુભબુદ્ધિઃ શુભાત્મકઃ ॥ ૬૮॥

શુભાન્વિતતનુઃ શુક્લતનુઃ શુક્લપ્રભાન્વિતઃ ।
સુશૌક્લઃ શુક્લદશનઃ શુક્લાભઃ શુક્લમાલ્યધૃત્ ॥ ૬૯॥

શુક્લપુષ્પપ્રિયઃ શુક્લવસનઃ શુક્લકેતનઃ ।
શેષાલઙ્કરણઃ શેષરહિતઃ શેષવેષ્ટિતઃ ॥ ૭૦॥

શેષારૂઢઃ શેષશાયી શેષાઙ્ગદવિરાજિતઃ ।
સતીપ્રિયઃ સાશઙ્કશ્ચ સમદર્શી સમાધિમાન્ ॥ ૭૧॥

સત્સઙ્ગી સત્પ્રિયઃ સઙ્ગી નિઃસઙ્ગી સઙ્ગવર્જિતઃ ।
સહિષ્ણુઃ શાશ્વતૈશ્વર્યઃ સામગાનરતઃ સદા ॥ ૭૨॥

સામવેત્તા સામ્યતરઃ શ્યામાપતિરશેષભુક્ ।
તારિણીપતિરાતામ્રનયનસ્ત્વરિતાપ્રિયઃ ॥ ૭૩॥

તારાત્મકસ્ત્વગ્વસનસ્તરુણીરમણો રતઃ ।
તૃપ્તિરૂપસ્તૃપ્તિકર્તા તારકારિનિષેવિતઃ ॥ ૭૪॥

વાયુકેશો ભૈરવેશો ભવાનીશો ભવાન્તકઃ ।
ભવબન્ધુર્ભવહરો ભવબન્ધનમોચકઃ ॥ ૭૫॥

અભિભૂતોઽભિભૂતાત્મા સર્વભૂતપ્રમોહકઃ ।
ભુવનેશો ભૂતપૂજ્યો ભોગમોક્ષફલપ્રદઃ ॥ ૭૬॥

દયાલુર્દીનનાથશ્ચ દુઃસહો દૈત્યમર્દકઃ ।
દક્ષકન્યાપતિર્દુઃખનાશકો ધનધાન્યદઃ ॥ ૭૭॥

દયાવાન્ દૈવતશ્રેષ્ઠો દેવગન્ધર્વસેવિતઃ ।
નાનાયુધધરો નાનાપુષ્પગુચ્છવિરાજિતઃ ॥ ૭૮॥

નાનાસુખપ્રદો નાનામૂર્તિધારી ચ નર્તકઃ ।
નિત્યવિજ્ઞાનસંયુક્તો નિત્યરૂપોઽનિલોઽનલઃ ॥ ૭૯॥

લબ્ધવર્ણો લઘુતરો લઘુત્વપરિવર્જિતઃ ।
લોલાક્ષો લોકસમ્પૂજ્યો લાવણ્ય પરિસંયુતઃ ॥ ૮૦॥

નપુરીન્યાસસંસ્થશ્ચ નાગેશો નગપૂજિતઃ ।
નારાયણો નારદશ્ચ નાનાભરણભૂષિતઃ ॥ ૮૧॥

નગભૂતો નગ્નદેશો નગ્નઃ સાનન્દમાનસઃ ।
નમસ્યો નતનાભિશ્ચ નમ્રમૂર્ધાભિવન્દિતઃ ॥ ૮૨॥

નન્દિકેશો નન્દિપૂજ્યો નાનાનીરજમધ્યગઃ ।
નવીનબિલ્વપત્રૌઘતુષ્ટો નવઘનદ્યુતિઃ ॥ ૮૩॥

નન્દઃ સાનન્દ આનન્દમયશ્ચાનન્દવિહ્વલઃ ।
નાલસંસ્થઃ શોભનસ્થઃ સુસ્થઃ સુસ્થમતિસ્તથા ॥ ૮૪॥

સ્વલ્પાસનો ભીમરુચિર્ભુવનાન્તકરામ્બુદઃ ।
આસન્નઃ સિકતાલીનો વૃષાસીનો વૃષાસનઃ ॥ ૮૫॥

વૈરસ્યરહિતો વાર્યો વ્રતી વ્રતપરાયણઃ ।
બ્રાહ્મ્યો વિદ્યામયો વિદ્યાભ્યાસી વિદ્યાપતિસ્તથા ॥ ૮૬॥

ઘણ્ટાકારો ઘોટકસ્થો ઘોરરાવો ઘનસ્વનઃ ।
ઘૂર્ણચક્ષુરઘૂર્ણાત્મા ઘોરહાસો ગભીરધીઃ ॥ ૮૭॥

ચણ્ડીપતિશ્ચણ્ડમૂર્તિશ્ચણ્ડો મુણ્ડી પ્રચણ્ડવાક્ ।
ચિતાસંસ્થશ્ચિતાવાસશ્ચિતિર્દણ્ડકરઃ સદા ॥ ૮૮॥

ચિતાભસ્માભિસંલિપ્તશ્ચિતાનૃત્યપરાયણઃ ।
ચિતાપ્રમોદી ચિત્સાક્ષી ચિન્તામણિરચિન્તકઃ ॥ ૮૯॥

ચતુર્વેદમયશ્ચક્ષુશ્ચતુરાનનપૂજિતઃ ।
ચીરવાસાશ્ચકોરાક્ષશ્ચલન્મૂર્તિશ્ચલેક્ષણઃ ॥ ૯૦॥

ચલત્કુણ્ડલભૂષાઢ્યશ્ચલદ્ભૂષણભૂષિતઃ ।
ચલન્નેત્રશ્ચલત્પાદશ્ચલન્નૂપુરરાજિતઃ ॥ ૯૧॥

સ્થાવરઃ સ્થિરમૂર્તિશ્ચ સ્થાવરેશઃ સ્થિરાસનઃ ।
સ્થાપકઃ સ્થૈર્યનિરતઃ સ્થૂલરૂપી સ્થલાલયઃ ॥ ૯૨॥

સ્થૈર્યાતિગઃ સ્થિતિપરઃ સ્થાણુરૂપી સ્થલાધિપઃ ।

ઐહિકો મદનાર્તશ્ચ મહીમણ્ડલપૂજિતઃ ॥ ૯૩॥

મહીપ્રિયો મત્તરવો મીનકેતુવિમર્દકઃ ।
મીનરૂપો મનિસંસ્થો મૃગહસ્તો મૃગાસનઃ ॥ ૯૪॥

માર્ગસ્થો મેખલાયુક્તો મૈથિલીશ્વરપૂજિતઃ ।
મિથ્યાહીનો મઙ્ગલદો માઙ્ગલ્યો મકરાસનઃ ॥ ૯૫॥

મત્સ્યપ્રિયો મથુરગીર્મધુપાનપરાયણઃ ।
મૃદુવાક્યપરઃ સૌરપ્રિયો મોદાન્વિતસ્તથા ॥ ૯૬॥

મુણ્ડાલિર્ભૂષણો દણ્ડી ઉદ્દણ્ડો જ્વલલોચનઃ ।
અસાધ્યસાધકઃ શૂરસેવ્યઃ શોકાપનોદનઃ ॥ ૯૭॥

શ્રીપતિઃ શ્રીસુસેવ્યશ્ચ શ્રીધરઃ શ્રીનિકેતનઃ ।
શ્રીમતાં શ્રીસ્વરૂપશ્ચ શ્રીમાન્શ્રીનિલયસ્તથા ॥ ૯૮॥

શ્રમાદિક્લેશરહિતઃ શ્રીનિવાસઃ શ્રિયાન્વિતઃ ।
શ્રદ્ધાલુઃ શ્રાદ્ધદેવશ્ચ શ્રાદ્ધો મધુરવાક્ તથા ॥ ૯૯॥

પ્રલયાગ્ન્યર્કસઙ્કાશઃ પ્રમત્તનયનોજ્જ્વલઃ ।
અસાધ્યસાધકઃ શૂરસેવ્યઃ શોકાપનોદનઃ ॥ ૧૦૦॥

વિશ્વભૂતમયો વૈશ્વાનરનેત્રોઽધિમોહકૃત્ ।
લોકત્રાણપરોઽપારગુણઃ પારવિવર્જિતઃ ॥ ૧૦૧॥

અગ્નિજિહ્વો દ્વિજાસ્યશ્ચ વિશ્વાસ્યઃ સર્વભૂતધૃક્ ।
ખેચરઃ ખેચરાધીશઃ સર્વગઃ સાર્વલૌકિકઃ ॥ ૧૦૨॥

સેનાનીજનકઃ ક્ષુબ્ધાબ્ધિર્વારિક્ષોભવિનાશકઃ ।
કપાલવિલસદ્ધસ્તઃ કમણ્ડલુભૃદર્ચિતઃ ॥ ૧૦૩॥

કેવલાત્મસ્વરૂપશ્ચ કેવલજ્ઞાનરૂપકઃ ।
વ્યોમાલયનિવાસી ચ બૃહદ્વ્યોમસ્વરૂપકઃ ॥ ૧૦૪॥

અમ્ભોજનયનોઽમ્ભોધિશયાનઃ પુરુષાતિગઃ ।
નિરાલમ્બોઽવલમ્બશ્ચ સમ્ભોગાનન્દરૂપકઃ ॥ ૧૦૫॥

યોગનિદ્રામયો લોકપ્રમોહાપહરાત્મકઃ ।
બૃહદ્વક્ત્રો બૃહન્નેત્રો બૃહદ્બાહુર્બૃહદ્બલઃ ॥ ૧૦૬॥

બૃહત્સર્પાઙ્ગદો દુષ્ટબૃહદ્વ્યાલવિમર્દકઃ ।
બૃહદ્ભુજબલોન્મત્તો બૃહત્તુણ્ડો બૃહદ્વપુઃ ॥ ૧૦૭॥

બૃહદૈશ્વર્યયુક્તસ્ય બૃહદૈશ્વર્યદઃ સ્વયમ્ ।
બૃહત્સમ્ભોગસનુષ્ટો બૃહદાનન્દદાયકઃ ॥ ૧૦૮॥

બૃહજ્જટાજૂટધરો બૃહન્માલી બૃહદ્ધનુઃ ।
ઇન્દ્રિયાધિષ્ઠિતઃ સર્વલોકેન્દ્રિયવિમોહકૃત્ ॥ ૧૦૯॥

સર્વેન્દ્રિયપ્રવૃત્તિકૃત્ સર્વેન્દ્રિયનિવૃત્તિકૃત્ ।
પ્રવૃત્તિનાયકઃ સર્વવિપત્તિપરિનાશકઃ ॥ ૧૧૦॥

પ્રવૃત્તિમાર્ગનેતા ત્વં સ્વતન્ત્રેચ્છામયઃ સ્વયમ્ ।
સત્પ્રવૃત્તિરતો નિત્યં દયાનન્દશિવાધરઃ ॥ ૧૧૧॥

ક્ષિતિરૂપસ્તોયરૂપી વિશ્વતૃપ્તિકરસ્તથા ।
તર્પસ્તર્પણસમ્પ્રીતસ્તર્પકસ્તર્પણાત્મકઃ ॥ ૧૧૨॥

તૃપ્તિકારણભૂતશ્ચ સર્વતૃપ્તિપ્રસાધકઃ ।
અભેદો ભેદકોઽચ્છિદ્યચ્છેદકોઽચ્છેદ્ય એવ હિ ॥ ૧૧૩॥

અચ્છિન્નધન્વાઽચ્છિન્નેષુરચ્છિન્નધ્વજવાહનઃ ।
અદૃષ્ટઃ સમધૃષ્ટાસ્ત્રઃ સમધૃષ્ટો બલોન્નતઃ ॥ ૧૧૪॥

ચિત્રયોધી ચિત્રકર્મા વિશ્વસઙ્કર્ષકઃ સ્વયમ્ ।
ભક્તાનામીપ્સિતકરઃ સર્વેપ્સિતફલપ્રદઃ ॥ ૧૧૫॥

વાઞ્છિતાભીષ્ટફલદોઽભિન્નજ્ઞાનપ્રવર્તકઃ ।
બોધનાત્મા બોધનાર્થાતિગઃ સર્વપ્રબોધકૃત્ ॥ ૧૧૬॥

ત્રિજટશ્ચૈકજટિલશ્ચલજ્જૂટો ભયાનકઃ ।
જટાટીનો જટાજૂટસ્પૃષ્ટાવરવચઃ સ્વયમ્ ॥ ૧૧૭॥

ષાણ્માતુરસ્ય જનકઃ શક્તિઃ પ્રહરતાં વરઃ ।
અનર્ઘાસ્ત્રપ્રહારી ચાનર્ઘધન્વા મહાર્ઘ્યપાત્ ॥ ૧૧૮॥

યોનિમણ્ડલમધ્યસ્થો મુખયોનિરજૃમ્ભણઃ ।
મહાદ્રિસદૃશઃ શ્વેતઃ શ્વેતપુષ્પસ્રગન્વિતઃ ॥ ૧૧૯॥

મકરન્દપ્રિયો નિત્યં માસર્તુહાયનાત્મકઃ ।
નાનાપુષ્પપ્રસૂર્નાનાપુષ્પૈરર્ચિતગાત્રકઃ ॥ ૧૨૦॥

ષડઙ્ગયોગનિરતઃ સદાયોગાર્દ્રમાનસઃ ।
સુરાસુરનિષેવ્યાઙ્ઘ્રિર્વિલસત્પાદપઙ્કજઃ ॥ ૧૨૧॥

સુપ્રકાશિતવક્ત્રાબ્જઃ સિતેતરગલોજ્જ્વલઃ ।
વૈનતેયસમારૂઢઃ શરદિન્દુસહસ્રવત્ ॥ ૧૨૨॥

જાજ્વલ્યમાનસ્તેજોભિર્જ્વાલપુઞ્જો યમઃ સ્વયમ્ ।
પ્રજ્વલદ્વિદ્યુદાભશ્ચ સાટ્ટહાસભયઙ્કરઃ ॥ ૧૨૩॥

પ્રલયાનલરૂપી ચ પ્રલયાગ્નિરુચિઃ સ્વયમ્ ।
જગતામેકપુરુષો જગતાં પ્રલયાત્મકઃ ॥ ૧૨૪॥

પ્રસીદ ત્વં જગન્નાથ જગદ્યોને નમોઽસ્તુ તે ॥ ૧૨૫॥

શ્રીમહાદેવ ઉવાચ-
એવં નામસહસ્રેણ રાજ્ઞા વૈ સંસ્તુતો હરઃ ।
પ્રત્યક્ષમગમત્તસ્ય સુપ્રસન્નમુખામ્બુજઃ ॥ ૧૨૬॥

સ તં વિલોક્ય ત્રિદશૈકનાથં
પઞ્ચાનનં શ્વેતરુચિં પ્રસન્નમ્ ।
વૃષાધિરૂઢં ભુજગાઙ્ગદૈર્યુતં
નનર્ત રાજા ધરણીભુજાં વરઃ ॥ ૧૨૭॥

પ્રોવાચ ચેદં પરમેશ્વરાદ્ય મે
એતાનિ સર્વાણિ સુખાર્થકાનિ ।
તપશ્ચ હોમશ્ચ મનુષ્યજન્મ
યત્ત્વાં પ્રપશ્યામિ દૃશા પરેશમ્ ॥ ૧૨૮॥

મત્તો ન ધન્યોસ્તિ મહીતલે વા
સ્વર્ગે યતસ્ત્વં મમ નેત્રગોચરઃ ।
સુરાસુરાણામપિ દુર્લભેક્ષણઃ
પરાત્પરઃ પૂર્ણમયો નિરામયઃ ॥ ૧૨૯॥

તતસ્તમેવં પ્રતિભાષમાણં
પ્રાહ પ્રપન્નાર્તિહરો મહેશ્વરઃ ।
કિં તે મનોવાઞ્છિતમેવ વિદ્યતે
વૃણુષ્વ તત્પુત્ર દદામિ તુભ્યમ્ ॥ ૧૩૦॥

સચાહ પૂર્વં કપિલસ્ય શાપતઃ
પાતાલરન્ધ્રે મમ પૂર્વવંશજાઃ ।
ભસ્મીબભૂવુઃ સગરસ્ય પુત્રા
મહાબલા દેવસમાનવિક્રમાઃ ॥ ૧૩૧॥

તેષાં તુ નિસ્તારણકામ્યયા હ્યહં
ગઙ્ગાં ધરણ્યામભિનેતુમીહે ।
સા તુ ત્વદીયા પરમા હિ શક્તિઃ
વિનાજ્ઞયા તે ન હિ યાતિ પૃથ્વીમ્ ॥ ૧૩૨॥

તદેતદિચ્છામિ સમેત્ય ગઙ્ગા
ક્ષિતૌ મહાવેગવતી મહાનદી ।
પ્રવિશ્ય તસ્મિન્વિવરે મહેશ્વરી
પુનાતુ સર્વાન્સગરસ્ય પુત્રાન્ ॥ ૧૩૩॥

ઇત્યેવમાકર્ણ્ય વચઃ પરેશ્વરઃ
પ્રોવાચ વાક્યં ક્ષિતિપાલપુઙ્ગવમ્ ।
મનોરથસ્તેઽયમવેહિ પૂર્ણો
મમ પ્રસાદાદચિરાદ્ભવિષ્યતિ ॥ ૧૩૪॥

યે ચાપિ માં ભક્તિત એવ મર્ત્યાઃ
સ્તોત્રેણ ચાનેન નૃપ સ્તુવન્તિ ।
તેષાં તુ પૂર્ણાઃ સકલા મનોરથા
ધ્રુવં ભવિષ્યન્તિ મમ પ્રસાદાત્ ॥ ૧૩૫॥

શ્રીમહાદેવ ઉવાચ-
ઇત્યેવં સ વરં લબ્ધ્વા રાજા હૃષ્ટમનાસ્તતઃ ।
દણ્ડવત્પ્રણિપત્યાહ ધન્યોઽહં ત્વત્પ્રસાદતઃ ॥ ૧૩૬॥

તતશ્ચાન્તર્દધે દેવઃ ક્ષણાદેવ મહામતે ।
રાજા નિર્વૃત્તચેતાઃ સ બભૂવ મુનિસત્તમ ॥ ૧૩૭॥

રાજ્ઞા કૃતમિદં સ્તોત્રં સહસ્રનામસંજ્ઞકમ્ ।
યઃ પઠેત્પરયા ભક્ત્યા સ કૈવલ્યમવાપ્નુયાત્ ॥ ૧૩૮॥

ન ચેહ દુઃખં કુત્રાપિ જાયતે તસ્ય નારદ ।
જાયતે પરમૈશ્વર્યં પ્રસાદાચ્ચ મહેશિતુઃ ॥ ૧૩૯॥

મહાપદિ ભયે ઘોરે યઃ પઠેત્સ્તોત્રમુત્તમમ્ ।
શમ્ભોર્નામસહસ્રાખ્યં સર્વમઙ્ગલવર્ધનમ્ ॥ ૧૪૦॥

મહાભયહરં સર્વસુખસમ્પત્તિદાયકમ્ ।
સ મુચ્યતે મહાદેવપ્રસાદેન મહાભયાત્ ॥ ૧૪૧॥

દુર્ભિક્ષ્યે લોકપીડાયાં દેશોપદ્રવ એવ વા ।
સમ્પૂજ્ય પરમેશાનં ધૂપદીપાદિભિર્મુને ॥ ૧૪૨॥

યઃ પઠેત્પરયા ભક્ત્યા સ્તોત્રં નામસહસ્રકમ્ ।
ન તસ્ય દેશે દુર્ભિક્ષં ન ચ લોકાદિપીડનમ્ ॥ ૧૪૩॥

ન ચાન્યોપદ્રવો વાપિ ભવેદેતત્સુનિશ્ચિતમ્ ।
પર્જન્યોઽપિ યથાકાલે વૃષ્ટિં તત્ર કરોતિ હિ ॥ ૧૪૪॥

યત્રેદં પઠ્યતે સ્તોત્રં સર્વપાપપ્રણાશનમ્ ।
સર્વસસ્યયુતા પૃથ્વી તસ્મિન્દેશે ભવેદ્ધ્રુવમ્ ॥ ૧૪૫॥

ન દુષ્ટબુદ્ધિર્લોકાનાં તત્રસ્થાનાં ભવેદપિ ।
નાકાલે મરણં તત્ર પ્રાણિનાં જાયતે મુને ॥ ૧૪૬॥

ન હિંસ્રાસ્તત્ર હિંસન્તિ દેવદેવપ્રસાદતઃ ।
ધન્યા દેશાઃ પ્રજા ધન્યા યત્ર દેશે મહેશ્વરમ્ ॥ ૧૪૭॥

સમ્પૂજ્ય પાર્થિવં લિઙ્ગં પઠેદ્યત્રેદમુત્તમમ્ ।
ચતુર્દશ્યાં તુ કૃષ્ણાયાં ફાલ્ગુને માસિ ભક્તિતઃ ॥ ૧૪૮॥

યઃ પઠેત્પરમેશસ્ય નામ્નાં દશશતાખ્યકમ્ ।
સ્તોત્રમત્યન્તસુખદં ન પુનર્જન્મભાગ્ભવેત્ ॥ ૧૪૯॥

વાયુતુલ્યબલો નૂનં વિહરેદ્ધરણીતલે ।
ધનેશતુલ્યો ધનવાન્કન્દર્પસમરૂપવાન્ ॥ ૧૫૦॥

વિહરેદ્દેવતાતુલ્યો નિગ્રહાનુગ્રહે ક્ષમઃ ।
ગઙ્ગાયાં વા કુરુક્ષેત્રે પ્રયાગે વા મહેશ્વરમ્ ।
પરિપૂજ્ય પઠેદ્યસ્તુ સ કૈવલ્યમવાપ્નુયાત્ ॥ ૧૫૧॥

કાશ્યાં યસ્તુ પઠેદેતત્સ્તોત્રં પરમમઙ્ગલમ્ ।
તસ્ય પુણ્યં મુનિશ્રેષ્ઠ કિમહં કથયામિ તે ॥ ૧૫૨॥

એતત્સ્તોત્રપ્રસાદેન સ જીવન્નેવ માનવઃ ।

સાક્ષાન્મહેશતામેતિ મુક્તિરન્તે કરસ્થિતા ॥ ૧૫૩॥

પ્રત્યહં પ્રપઠેદેતદ્બિલ્વમૂલે નરોત્તમઃ ।
સ સાલોક્યમવાપ્નોતિ દેવદેવપ્રસાદતઃ ॥ ૧૫૪॥

યો હ્યેતત્પાઠયેત્સ્તોત્રં સર્વપાપનિબર્હણમ્ ।
સ મુચ્યતે મહાપાપાત્સત્યં સત્યં વદામિ તે ॥ ૧૫૫॥

ન તસ્ય ગ્રહપીડા સ્યાન્નાપમૃત્યુભયં તથા ।
ન તં દ્વિષન્તિ રાજાનો ન વા વ્યાધિભયં ભવેત્ ॥ ૧૫૬॥

પઠેદેતદ્ધૃદિ ધ્યાત્વા દેવદેવં સનાતનમ્ ।
સર્વદેવમયં પૂર્ણં રજતાદ્રિસમપ્રભમ્ ॥ ૧૫૭॥

પ્રફુલ્લપઙ્કજાસ્યં ચ ચારુરૂપં વૃષધ્વજમ્ ।
જટાજૂટજ્વલત્કાલકૂટશોભિતવિગ્રહમ્ ॥ ૧૫૮॥

ત્રિશૂલં ડમરુ ચૈવ દધાનં દક્ષવામયોઃ ।
દ્વીપિચર્મામ્બરધરં શાન્તં ત્રૈલોક્યમોહનમ્ ॥ ૧૫૯॥

એવં હૃદિ નરો ભક્ત્યા વિભાવ્યૈતત્પઠેદ્યદિ ।
ઇહ ભુક્ત્વા પરં ભોગં પરત્ર ચ મહામતે ॥ ૧૬૦॥

શમ્ભોઃ સ્વરૂપતાં યાતિ કિમન્યત્કથયામિ તે ॥ ૧૬૧॥

તત્રૈવ સદ્ભક્તિયુતઃ પઠેદિદં
સ્તોત્રં મમ પ્રીતિકરં પરં મુને ।
મર્ત્યો હિ યોઽન્યઃ ખલુ સોઽપિ કૃચ્છ્રં
જગત્પવિત્રાયત એવ પાપતઃ ॥ ૧૬૨॥

॥ શ્રીમહાભાગવતે ઉપપુરાણે ભગીરથપ્રોક્તં
શિવસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by DPD, Nithesh Bharadwaj Sivakumar

*Shri Shiva Sahasranamastotram from devIbhAgavata*

pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*